portion of it to the stage ' तस्यैकदेशः अभिनेयार्थः कृतः ( U. 4 ). **-ation,** *s.* संयोजनं, संविधानं. **-ed,** *a.* युक्त, योग्य, पर्याप्त.

**Add,** *v. t.* संकल् 10 ( कलयति ), परिगण् 10, परिसंख्या 2 P, सं-समा-युज् 10; 'he a. ed his army to the general's ' सेनापतेः सेनया स्वबलं संयोजयामास; समाचि 5 U, संमिल् c. **2** अन्यच्च ब्रू 2 U, or कथ् 10 or अभिधा 3 U; 'a. to ' वृध् c., पुष् 4 P, तन् 8 U; मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति (S. 1) 'a. s to her lustre' ; there is this also to a. to my ( grounds of ) anger ' एतदपि मे द्वितीयं संतापकारणं (Mr. 5); 'this is another evil to a. to the first' गंडस्योपरि पिटिका संवृत्ता (S. 2), अयमपरो गंडस्योपरि विस्फोटः ( Mu. 5 ). **-ition,** *s.* संमेलनं, संयोजनं, संयोगः. **2** परिगणनं, परिसंख्या, संकलनं. **3** ( Something added) आधिक्यं; 'he is a valuable a. to our side' अस्मत्पक्षेऽयमनर्घ्यः सहायः संजातः. **-itional,** *a.* अपर, अधिक, अधिकतर.

**Addict,** *v. t.* ( oneself ) आ-नि-सेव् 1 A; भज् 1 U; आसंज् pass., आसक्त-निरत *-a.* भू 1 P, (loc. ). **-ed,** *a.* आसक्त, प्रसक्त, निरत, निविष्ट, परायण, in comp. **-edness, -ion,** *s.* आसक्ति-प्रसक्ति *f.*, निषेवणं; व्यसनं, निरति *f.*, परायणता.

**Addle,** *a.* असंपूर्ण, नष्ट, दुष्ट; ' a. headed-pated ' मूढ, नष्टधी, दुर्मति.

**Address,** *v. t.* आमंत्र् 10 A; सं-अभि-आ-भाष् 1 A, अभिधा 3 U, संबुध् c., आलप् 1 P; 'a. ed his mind to Surya ' सूर्ये मनसाध्यायत्; 'a. me as is wont with you ' ( मां प्रति ) यथाभ्यस्तमभिधीयताम् (U. 1). **2** नाम ग्रह् 9 P, नामग्राहं वद् 1 P or आह्वे 1 P. **3** प्रहि 5 P, प्रेष् 10. **-s.** अभि-सं-भाषणं, संबोधनं &c. **2** वचनं, आलापः; 'mode of a.' आमंत्रणपदं; संशयिते परिणये नैष समुदाचारः (S. 5). ' not the proper mode of a.'; 'of agreeable a. ' मधुरालाप, प्रियंवद. **3** पटुता, दक्षता, नैपुण्यं. **4** ( Of a letter ) बाह्यनामन् *n.*; अदत्तबाह्यनामानं लेखं ( Mu. 1 ) ' a letter without any a. upon it '; ' send the letter to my a. ' दत्त-लिखित-मद्बाह्यनाम (मामुद्दिश्य) पत्रं प्रेषय. **5** ( Place of residence &c. ) नामधामविशेषाः.

**Adduce,** *v. t.*(proof, witness &c.) निर्दिश् 6 P, उपन्यस् 4 P, उपक्षिप् 6 P, उपानी 1 P; 'a. ing proofs ' प्रमाणोपन्यासः.

**Adept,** *a.* निपुण, कुशल, प्रवीण, अभिज्ञ.

**Adequate,** *a.* पर्याप्त, समर्थ, क्षम, तुल्य योग्य, अनुरूप. **-ly,** *adv.* पर्याप्तं. **Adequacy,** *s.* क्षमता, सामर्थ्य, &c.

**Adhere,** *v. i.* संज् pass., सज्ज् 1 P, संसक्त-अनुषक्त- *a.* भू, संलग् 1 P, (loc.); अनुबंध् 9 P. **2** अवलंब् 1 A, पाल् 10, रक्ष् 1 P; 'a. s to his promise' प्रतिज्ञां पालयति-रक्षति. **-ence,** *s.* आसक्ति *f.*, आसंगः, अनुषंगः, अवलंबनं. **-ent,** *s.* पक्षीयः, पक्ष्यः, सपक्षः. **2** अनुषंगिन् *m.*, सहायः, अनुगामिन् *m.* **-Adhesion,** *s.* संसक्ति *f.*, आसंगः, आसक्तिः, *f.* अवलंबनं; संलग्नत्वं. **-Adhesive,** *a.* संलग्नशील

**Adieu,** *adv.* स्वस्ति ( dat ). **-s.** आमंत्रणं, आप्रच्छनं; 'to bid a.' आप्रच्छ् 6 A आमंत्र् 10 A; आमंत्रयस्व सहचरं ( S. 3 ).

**Adjacent,** *a.* आसन्न, समीप, समीपवर्तिन्, सन्निकृष्ट, सन्निहित, निकटवर्तिन्, निकट, पार्श्वस्थ.

**Adjective,** *s.* विशेषणं.

**Adjoin,** *v. t.* लग् 1 P, समीपे-निकटे-वृत् 1 A or स्था 1 P; *See* **Adjacent** above.

**Adjourn,** *v. t.* व्याक्षिप् 6 P, विलंब c.; व्यवहारं त्यज् 1 P.

**Adjudge,** *v. t.* दा c. (दापयति). **2** निर्णयं कृ 8 U, निर्णीय समाप् c.

**Adjudicate,** *v. t.* निर्णी 1 P. *See* above.

**Adjunct,** *a.* संयुक्त, सहित. **-s.** अनुबंधः.

**Adjure,** *v. t.* सशपथं समादिश् 6 P, शप् c. **-ation,** *s.* सशपथं समादेशः, शपथः.

**Adjust,** *v. t.* समीकृ 8 U, समा-प्रतिसमा-धा 3 U, समायुज् 10, व्यवस्था c. (स्थापयति); ( accounts ) एकीकृ, संमिल् c. **-ment,** *s.* समाधानं, समायोगः, एकीकरणं.

**Adjutant,** *s.* सहायः, सहकारिन् *m.*

**Admeasure,** *v. t.* *See* ' **Measure** '.

**Administer,** *v. t.* प्रशास् 2 P, निर्वह् c., निर्वृत् c.; 'a. justice' धर्म-न्याय-विवेचनं कृ, न्यायं प्रणी 1 P, or प्रवृत् c.; ' a. an oath ' शप् c. **2** दा 3 U, प्रतिपद् c. **-Administration,** *s.* शासनं, प्रवर्तनं, निर्वाहः; राज्यधुरा; 'during his a.' तस्मिन् राज्यं (प्रजाः) शासति. **2** धर्मविवेचनं. **3** प्रकृति *f.*, सचिवाः. **4** साचिव्यं, मंत्रित्वं. **-Administrative,** *a.* शासनदक्ष, कार्यनिर्वाहकुशल. **-Administrator,** *s.* शासितृ *m.*, राज्यधुरंधरः. **2** प्रवर्तकः, प्रणेतृ *m.*

**Admiral,** *s.* नौसाधनाध्यक्षः.

**Admire,** *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, स्तु 2 U. **2** विस्मयेन दृश् 1 P. **-able,** *a.* श्लाघ्य, अद्भुत, प्रशंसनीय, अनुपम. **-ably,** *adv.* श्लाघ्यप्रकारेण, साधु, अद्भुतं. **-ation,** *s.* प्रशंसा, श्लाघा. **2** विस्मयः, आश्चर्यं. **-er,** *s.* प्रशंसकः, श्लाघिन् *m.*; ' a. of ladies ' कामिन् *m.*, कामुकः.

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007